Click here to go back



|| श्री महागणपतये नमः ||
Indian Astrology Source
www.astrovidya.com

## अथ अंगारक कवचं

ओं अस्य श्री अंगारक कवच महामंत्रस्य विरूपाक्ष ऋषिः। गायत्री छंदः। अंगारको देवता। अं बीजं। गं शक्तिः। रं कीलकं। मम अंगारक ग्रह प्रसादसिद्ध्यर्थे जपे विनियोगः॥ (करन्यासः) अं अंगुष्ठाभ्यां नमः। ईं तर्जनीभ्यां नमः। ऊं मध्यमाभ्यां नमः। ऐं अनामिकाभ्यां नमः। औं कनिष्ठिकाभ्यां नमः। अः करतलकरपृष्ठाभ्यां नमः॥ (अंगन्यासः) अं हृदयाय नमः। ईं शिरसे स्वाहा। ऊं शिखायै वषट्। ऐं कवचाय हुं। औं नेत्रत्रयाय वौषट्। अः अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्भंधः॥ (ध्यानं) नमाम्यंगारकं देवं रक्तांगंवरभूषणं। जानुस्थं वामहस्ताभ्यां चापेशु वरपाणिनं॥ चतुर्भुजं मेषवाहनं वरदं च धरासुतं शक्तिशूलगदाहस्तं ज्वालापुंजोर्ध्वकेशं। मेरूं प्रदक्षिणं यांतं सर्वदेवेष्टसिद्धिदं॥ अंगारकश्शिरोरक्षेत्मुखं वै धरणीसुतः। कर्णौ रक्तांबरः पातु नेत्रे मे रक्तलोचनः॥ नासिकां मे शक्तिधरः कंठं मे पातु भौमकः। भुजौ तु रक्तमाली च हस्तंशूलधरस्तथा॥ चतुर्भुजो मे हृदयं कुक्षिं रोगापहारकः। कटिं मे भूसुतः पातु पादौ भौमस्सदा मम॥ सर्वाणि यानि चांगानि रक्षेत्मेषवाहनः॥ य इदं कवचं दिव्यं सर्वशत्रुविनाशनं। भूतप्रेत पिशाचानां नाशनं सर्वसिद्धिदं॥ सर्वरोगहरं चैव सर्व संपत्प्रदं शुभं। भुक्ति मुक्तिप्रदं नृणां सर्वसौभाग्यवर्धनं॥ ऋणबंधविमोचं च सत्यमेव न संशयः। स्तोत्रपाठस्तु कर्तव्यो देवस्याग्रे समाहितः॥ रक्तगंधाक्षतैः पुष्पै धूपदीप गुडोदनैः। मंगळं पूजयित्वातु मंगळाहनि सर्वदा॥ ब्राह्मणान्भोजयेत्वश्चात् चतुरोद्वादशोथवा। अनेन विधिना यस्तु कृत्वा व्रतमनुत्तमं॥ व्रतं सदैव कुर्वीत सप्तवारेषु वा यदि। तेषां शस्त्राण्युत्वलानि वह्निस्याच्चंद्रशीतलः॥ नचैव व्याधयंत्येन मृगपक्षि गजादयः। महांधतमसे प्राप्ते मार्तांडस्योदयादिव॥ विलयं यांति पापानि शतजन्मार्जितानि वै। इति श्री मार्कंडेय महापुराणे सनत्कुमार संवादे अंगारक कवचं॥

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com

Click here to go back